# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवेम्बर-दिसम्बर, २०१६

कक्षा – आचार्यप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – 2** गुणाः – ७०

विषयः – फलितज्योतिषम् **कोड – C.C.4.1.1** समयः – ०३:००-०६:००

दिनाङ्कः –०६/१२/१६ सन्दर्भग्रन्थः – वृहत्संहिता

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितयोः एकस्य ससन्दर्भं व्याख्या कार्या।** ०४

(१) ज्योति:शास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं
तत्कात्स्न्योपनयस्य नाम मुनिभि: सङ्कीर्त्यते संहिता।
स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ
होरान्योऽङ्गविनिश्चयश्च कथित: स्कन्धस्तृतीयोऽपर:॥

(२) भिन्न: सितेन मगधान् यवनान् पुलिन्दान्
नेपालभृङ्गिमरुकच्छसुराष्ट्रमद्रान्।
पाञ्चालकैकयकुलूतकपूरुषादान्
हन्यादुशीनरजनानपि सप्तमासान्॥

**प्रश्नः – २ अधोलिखितयोः कस्यचिदेकस्य सारांशं लिखत।** १२

(१) बुधचाराध्यायस्य सारांश: (२) उपनयनाध्यायस्य सारांश:।

**प्रश्नः – ३ निम्नलिखितेषु द्वयोः अतिलघुत्तरं लिखत।** ०४

(१) विश्वस्य आत्मा क: ग्रह: अस्ति?

(२) ज्योतिषशास्त्रे कति सिद्धान्ता: सन्ति?

(३) यदि श्रवनक्षत्रोदितभौम: पुष्यनक्षत्रे गत्वा वक्री भवति चेत् किं फलम्?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ४ अधोलिखितयोः एकस्य ससन्दर्भं व्याख्या कार्या।** ०४

(१) रोहिण्योऽनिलभं च वत्सरतनुर्नाभिस्त्वषाढाद्वयं
सार्पं हृत्पितृदैवतं च कुसुमं शुद्धैशुभं तै फलम्।
देहे क्रूरनिपीडितेऽग्न्यनिलजं नाभ्यां भयंक्षुत्कृतं
पुष्पे मूलफलक्षयोऽथ हृदये सस्यस्य नाशो ध्रुवम्॥

(२) यदा स्थिता जीवबुधारसूर्यजा: सितस्य सर्वेऽग्रिपथानुवर्तिन:।
नृनागविद्याधरसङ्गरा: तदा भवन्ति वाताश्च समुच्छ्रितान्तका:॥
न मित्रभावे सुहृदो व्यवस्थिता: क्रियासु सम्यग् न रता द्विजातय:।
न चाल्पमप्यम्बु ददाति वासवो भिनत्ति वज्रेण शिरांसि भूभृताम्॥

**प्रश्नः – ५ अधोलिखितयोः कस्यचिदेकस्य सारांशं लिखत।** १२

(१) बृहस्पतिचाराध्याय:

(२) अगस्त्यचाराध्याय:

**प्रश्नः – ६ निम्नलिखितेषु द्वयोः अतिलघुत्तरं लिखत।** ०४

(१) यदि बृहस्पतिः एकवर्षाभ्यन्तरे सार्द्धद्वयनक्षत्रे विचरणं करोति तदा किं फलम्?

(२) यदि गुरुः अग्निवर्णयुक्तः भवति चेत् किं फलम्?(३) शनैश्चरः श्वेतवर्णयुक्तः भवति चेत् किं फलम्?

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ७ अधोलिखितयोः एकस्य ससन्दर्भं व्याख्या कार्या।** ०४

(१) रविरविसुतभोगमागतं क्षितिसुतभेदनवक्रदुषितम
ग्रहणगतमथोल्कया हतं नियतमुषाकरपीडितं च यत्॥
तदुपहतमितिप्रचक्षते प्रकृतिविपर्ययातमेव वा॥
निगदितपरिवर्गदूषणं कथितविपर्ययगं समृद्धये॥

(२) गुरुणा जितेऽवनिसुते वाह्लीका यायिनोऽग्निवार्ताश्च
शशिजेन शूरसेनाः कलिङ्गशाल्वाश्च पीडयन्ते॥
सौरेणारे विजिते जयन्ति पौराः प्रजाश्च सीदन्ति।
कोष्ठागारम्लेच्छक्षत्रियतापश्च शुक्रजिते॥

**प्रश्नः – ८ अधोलिखितयोः कस्यचिदेकस्योपरि निबन्धं लिखत।** ०८

(१) भौमस्य वर्षफलम् एवं बुधस्य वर्षफलम् (२) नक्षत्रव्यूहध्यायस्य सारांशः

**प्रश्नः – ९ अधोनिर्दिष्टेषु त्रयाणाम् अतिलघूत्तरं यच्छत** ०३

(१) तस्करशब्दस्य कोऽर्थः? (३) पाशिकशब्दस्य कोऽर्थः ?

(२) महामात्रशब्दस्य कोऽर्थः? (४) मायापटुशब्दस्य कोऽर्थः

(५) संसारस्य प्राणः कः?

**चतुर्थान्वितिः (Unit-४)**

**प्रश्नः – १० अधोलिखितयोः एकस्य ससन्दर्भं व्याख्या कार्या।** ०४

(१) पूर्वोद्धुतैः सस्यनिष्पत्तिरब्दैराग्नेयाशासम्भवैराग्निकोपः।
याम्ये सस्यं क्षीयते नैऋतेऽर्द्धं पञ्चाज्जातैः शोभना वृष्टिरब्दैः॥
वायव्योत्थैर्वातवृष्टिः क्वचिच्च पुष्टा वृष्टिः सौम्यकाष्ठासमुत्थैः।
श्रेष्ठं सस्यं स्थाणुदिक्सम्प्रवृद्धैर्वायुश्चैवं दिक्षुधत्ते फलानि॥

(२) मुक्तारजतनिकाशास्तमालनीलोत्पलाञ्जनाभासः।
जलचरसत्त्वाकारा गर्भेषु घनाः प्रभूतजलाः॥
तीव्रदिवाकरकिरणाभितापिता मन्दमारुता जलदाः।
रुषिता इव धाराभिर्विसृजन्त्यम्भः प्रसवकाले॥

**प्रश्नः – ११ अधोलिखितयोः कस्यचिदेकस्य सारांशं लिखत।** ०८

(१) आषाढीयोगाध्यायः (२) रोहिणीयोगाध्यायः

**प्रश्नः – १२ निम्नलिखितेषु त्रयाणाम् उत्तरं लिखत।** ०३

(१) वृष्टिगर्भधारणे सावनमानेन पञ्चनवत्यधिकशततमे दिवसे कः नक्षत्रम् आयाति?

(२) यदि (वृष्टेः) गर्भः शुक्लपक्षे भवति तदा कस्मिन् पक्षे प्रसवः भवेत्?

(३) यदि गर्भकाले मेघः पूर्वदिशि भवति,तदा प्रसवकालः कस्मिन् दिशि भवति?

(४) मेघाच्छन्नः इति शब्दस्य अर्थः कः? (५) चित्रानक्षत्रस्य उत्तरभागे तारा का वर्तते?